Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# विविधदर्शनेषु मोक्षस्वरूपम्



**साधुः मुनिवत्सलदासः,**
**गुरुवर्याः माधवप्रियदासजीस्वामिनः,**
**दर्शनम् संस्कृत संस्थानम्-SGVP, Ahmedabad, Gujarat, India.**

**Article Info**
Volume 4 Issue 2
Page Number: 20-25

**Publication Issue :**
March-April-2021

**Article History**
Accepted : 02 March 2021
Published : 07 March 2021

**सारांशः –** वेदान्तविदां मते ब्रह्म परमान्नम्, जीवोऽपि मुक्तावस्थायां तस्मिन् परमान्ने निपतति, तत्र स आनन्दमनुभवति। विशिष्टाद्वैतिन एतस्मात् विभिन्नं मतमुपस्थापयन्ति । तेषां मतेन परमान्नतालाभे स आनन्दो जायते, यश्च तद्भक्षणे जायते । अत एव ते रामकृष्णादिना ब्रह्मणा कृतसन्निधाना अस्यामवस्थायां अक्षय्यमानन्दमनुभवन्ति । अस्यां स्थितौ मीमांसकः सुखदुःखादिभिर्निर्लिप्तस्सन् स्वस्थस्तिष्ठति, इयमेव वास्तविकी मुक्तिः । आनन्दानन्द एव किमिव न स्यात्, एकया दृष्ट्या तदपि बन्धनमेव । यस्मान्मुक्तिः परमावश्यकी।

**मुख्यशब्दः–** मोक्षः, ब्रह्मः, वेदान्तः, जीवः,विधिदर्शनः,मीमांसा, अपवर्गः,निःश्रेयसम्।

अप उपसर्गपूर्वकं वृजु-वर्जने इति धातोः घञ्-प्रत्ययेन व्युत्पन्नोऽयं अपवर्गशब्दः। अमृतं, अपवर्गः, निःश्रेयसम्, मुक्तिरित्यादिशब्दै अभिलपमानं मोक्षपदमिदं संसारमूलस्य सकलस्य दुःखस्य आत्यन्तिकीं निवृत्तिमुपपादयति । संसारसम्बद्धया अनेकया असह्यया विविधया वेदनया त्रस्तस्सन् बुद्धिमानपि पुरुषः स्वीयां मुक्तिमभिकाङ्क्षति।

भारतीयाः हि वयं विशेषतो मोक्षाभिकाङ्क्षिणः धर्मार्थकाममोक्षरूपेषु चतुर्विधेषु पुरुषार्थेषु मोक्ष एव अस्माकं परमं लक्ष्यम् । अत एव स्वकीयस्यास्य चरमोद्देश्यस्य विषये सर्वैरपि दार्शनिकैः स्वस्वमतानि प्रस्थापितानि।

न्यायदर्शनप्रवर्तकेन सूत्रकृता भगवता गौत्तमेन द्वादशविधप्रमेयेषु अन्यतमत्वेन अपवर्गपदेन संसूचितः मोक्षः। यथा **आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्**[1] इति

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

। तत्र च **तदत्यन्तविमोक्षोऽपवर्गः** इति मोक्षस्वरूपाभिधायके सूत्रेऽस्मिन् दुःखस्य निःशेषेण निवृत्तिरेव मोक्ष इत्युपपादितम् । अतः तन्मते मुक्त्यवस्थायां दुःखप्राप्तेः सम्भावना अपि नास्तीति विशेषः । तदुक्तं श्लोकवार्तिककारैः – **यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।**

तस्माने च वैशेषिके तन्त्रे महर्षिणा कणादेन च **तदभावेसंयोगाभावोऽप्रादुर्भावश्च मोक्षः**[2] इति अदृष्टसम्बन्धाभावे सति शरीरस्य विलक्षणसंयोगाभावम् अनुत्पत्तिं वा मोक्षशब्देन अभिधाय स्फुटं परिचयम् अकारयत । यतोहि प्राप्तजन्माः जीवाः सुखदुःखयोः द्वयोरपि भोगमवश्यं प्राप्नुयुः । भोगश्च अदृष्टादिजन्य भौतिकशरीरद्वारा । कृते च तदुच्छेदे जन्मनिवृत्या न हि कस्यापि दुःखस्य सम्भावनाभूमिरपि आत्मा भवितुमर्हति ।

प्राप्तापवर्गे तस्मिन् आत्मनि कस्यापि गुणस्य आधेयत्वं न सम्भवतीत्यत एव **अशेषविशेषगुणोच्छेदो मोक्षः**[3] इति कणभक्षस्याऽभिप्रैतिः । आत्मगतानाम् अशेषाणां विशेषगुणानामुच्छेदे सत्यपि आत्मोच्छेदस्तु न भवति, निर्विकारत्वात् नित्यत्वाद्वा ।

एवं कणभक्षानाम् **प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्हेत्वाभासाच्छलजातिनिग्रहस्थानानां तत्वज्ञानात् निःश्रेयसाधिगमः**[4] इत्यादि सूत्रोक्तानि षोडशसंख्याकानि तत्वानि निःश्रेयसाधिगमसाधनत्वेन उपपादितानि ।

न हि अशेषगुणोच्जेदावस्थामिमामालोक्य पाषाणकल्पत्वम् आहोस्वित् मूर्छावस्थात्वं वा मोक्षस्य उपपादयितुं शक्यम् । संसारसम्बद्धया असह्यया विविधया वेदनया त्रस्तस्सन् बुद्धिमानपि पुरुषः स्वीयाम् मूर्छावस्थामेव सामयिकीं कामयते इति दृष्टत्वात् ।

प्रापश्चिकवेदनायाः अननुभवं पाषाणवदुपस्थित्या एव जीवः दूरीकर्तुं शक्नोति । मूर्छाद्यवस्थायामपि अन्ते पुनः नानाविधानां भोगानां पुनरनुभवः अनिवार्यः परन्तु अपवर्गप्राप्तौ दुःखप्राप्तेः स्मभावनाऽपि नास्तीति विशेषः । अत एव च **स्वसमानाधिकरणदुःखप्रागभावसमानकालीनदुःखध्वंसः** इति परिष्कृतं च लक्षणं तन्त्रमर्मज्ञैः उपदर्शितम् । तदुक्तं च श्लोकवार्तिककारैः -

**यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।**
**अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ।** इति
शान्तरसस्वरूपव्याख्यानावसरे च साहित्यकाराः –
**न यत्र दुःखं न सुखं न चिन्ता न द्वैषरागौ न च काचिदिच्छा ।**
इत्यादिना स्वःपदास्पदस्याऽपवर्गस्यैवस्वरूपम् उपपादयाञ्चक्रुः ।
**न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति ।**
**अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः ।**[5]
इत्यादिना गुणोच्छेदपूर्वकं शरीरवियोगमेव अपवर्गत्वेन ब्रुवन्ति ।

एतादृशस्य चतुर्षु पुरुषार्थेष्वन्यतमस्य मोक्षस्य आत्मतत्वज्ञानसाध्यत्वं हि सर्वेऽपि अङ्गीकुर्वन्ति । तच्च आत्मतत्वज्ञानं पदार्थतत्वज्ञानाधिनम् । अत एव कणभक्षोक्त सप्तपदार्थ अविरुद्धतया प्रमाणप्रमेयादीनि षोडशसंख्यकानि तत्वानि निःश्रेयसाधिगमसाधनत्वेन उपपाद्य प्रधानस्य मोक्षस्य अवाप्तौ साधनत्वेनैव अस्य शास्त्रस्य उपयोगित्वम् ।

तदिदं सङ्गृह्य आह भगवत्पादेन श्रीमता शङ्कराचार्येण एकत्र यत् – **सकलविशेषगुणोच्छिन्ना आकाशसदृशीस्थितिरेव मुक्तिः कणभक्षमते । अक्षपादमते तु सा एव मुक्तिः आनन्दानुभूतिविशिष्टा इति तु विशेषः ।**

तदिदं समग्राहि सर्वदर्शनकारेण माधवाचार्येण स्वीये संक्षेपशङ्करजये – **तत्रापि नय्यायिक-आत्तवर्गः कणादपक्षाच्चरणाक्षपक्षे मुक्तेर्विशेषं वद सर्वविच्चेत् नो चेत् प्रतिज्ञां त्यजसर्ववित्वे ।**

**अत्यन्तनाशे गुणसङ्गतेर्या स्थितिर्नभोवत् कणभक्षपक्षे । मुक्तिस्त्वदीये चरणाक्षपक्षे सानन्दसंवित्सहिता विमुक्तिः** । इति ।

चतुर्षु पुरुषार्थेषुव्त्युत्कृष्टस्य मोक्षस्य आत्मतत्वज्ञानसाध्यत्वं हि सर्वेऽपि अङ्गीकुर्वन्ति । तच्च आत्मतत्वज्ञानं पदार्थतत्वज्ञानाधीनम् । अत एव कणभक्षोक्तानाम् अभावसहितानां द्रव्यादिसमवायान्तानां सप्तपदार्थानाम् अविरुद्धतया **प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डहेत्वाभासाच्छलजातिनिग्रह स्थानानां तत्वज्ञानात् निःश्रेयसाधिगमः** इत्यादि सूत्रोक्तानि षोडशसंख्याकानि तत्वानि निःश्रेयसाधिगमसाधनत्वेन उपपाद्य प्रधानस्य मोक्षस्य अवाप्तौ साधनत्वेनैव अस्य शास्त्रस्य उपयोगित्वम् ।

चार्वाक महाशयस्य मतेन शरीरात् विमोचनमेव मोक्षः । स च मरणानन्तरं किञ्चित् साधनं विनैव सर्वास्याऽपि संसिद्ध्यति, यतस्तेन शरीरमेव आत्मेति सिद्धान्तितम् । तत्प्रमाणयति -

**न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति ।**
**अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः ।।**[6]

इत्यादिना गुणोच्छेदपूर्वकं शरीरवियोगमेव अपवर्गत्वेन ब्रुवन्ति ते ।

अन्ये केचन सौगताः एवं संगिरन्ते यत् विचित्रवासनावशात् नीलपीतादिरूपेषु प्रवहन्ती ज्ञानधारा समग्रवासनानां विनाशे सति केवलविशुद्धज्ञानरूपा सति मोक्षः ।

जगतः समग्राणि दृश्यानि वासनया प्रवहन्ति ज्ञानरूपाणि च सन्ति । अस्याः वासनायाः विनाशे सति सृष्टिप्रपञ्चोयं स्वत एव अनेकरूपो न तिष्ठति । परं तेषां मतमिदं तदैव संगतं भवितुमर्हति यदा दृश्यपदार्थजातस्य समग्रस्य जगतः सर्वाथाऽभाव एव कल्प्येत ।

जीवब्रह्मणोः शरीरशरीरिभावसम्बन्धम् आधारीकृत्य अभेदमङ्गीकुर्वाणाः सविशेषाद्वैतिनस्तु परमप्राप्यभूतं परमात्मानम् अवाप्य अनुभूयमानम् आनन्दविशेषानुभवमेव मोक्षमातिष्ठन्ते । उपासकः

अनादिकर्मवासनाबलेन अवाप्तं प्रकृतिसम्बन्धमपि भगवद्कृपया दूरीकृत्य पुनर्जन्मरहितस्सन् मोक्षसाम्राज्यमधितिष्ठति । स च मोक्षावस्थायाम् **अपहतपाप्मा विजरो विमृत्युर्विशोको विजित्सः अपिपासः सत्यकामः सत्यसङ्कल्पः**[7] इति गुणाष्टकाविर्भावमुपगच्छति ।

अन्ये केचन विचारका सृष्टिप्रपञ्चस्य विनाश एव मोक्ष इत्याचक्षते । प्रपञ्चोऽयं अविद्या विनिर्मितः । यथा प्रबोधमात्रेणैव स्वप्नकालस्य सर्वः प्रपञ्चो विनश्यति, तथैव ब्रह्मविद्यया अविद्यायां नष्टायाम् अयं प्रपञ्चोऽपि स्वयमेव विलीयते । श्रुतिरप्यत्र प्रमाणम् – **यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाऽभूत् तत् केन कं पश्येत्, केन कं विजानीयात् ।**[8]

प्रपञ्चोऽविद्यया विनिर्मित इति मत्वा मतमिदं प्रवर्तते । परं प्रपञ्चस्त्वयं सत्यः । **यत्र त्वस्य सर्वमात्मैवाऽभूत्** इत्यादीनि उपनिषद्वाक्यानि प्रपञ्चस्वरूपखण्डनपराणि न सन्ति, परं **आत्मैवास्य सर्वस्य भोक्ता** इत्यभिप्रायं प्रकटीकुर्वन्ति । अतः प्रपञ्चोऽयं नास्त्यसत्यः, न चास्य कदाचित् विलयोऽपि भवितुमर्हति । अतः प्रपञ्चस्य विलयो मोक्ष इति कथनं तु सर्वथा निराधारम् ।

एतत्सर्वं खण्डयित्वा एतेभ्योऽतिरिक्तं मतं प्रस्तुवन्ति मीमांसकाः । अनेन सृष्टिप्रपञ्चेन सह विद्यमानस्य सम्बन्धस्य विलयो एव मोक्ष । सृष्टिप्रपञ्चोऽयं त्रिविधेन प्रकारेण मनुष्यं बध्नाति । भोगपात्रं शरीरम्, भोगसाधनानि इन्द्रियाणि, भोगयोग्याः शब्दादयो विषयाश्च । भोगेनात्र सुखदुःखादेः प्रत्यक्षानुभवोऽभिप्रेतः, एभ्यस्त्रिविधेभ्यो बन्धनेभ्य आत्यान्तिकरूपेण विच्छेदो मोक्षः । आत्यन्तिकविलयो कारणद्वयेन भवितुमर्हति । प्रथममुत्पन्नं शरीरम्, इन्द्रियाणि, विषयाश्च नष्टा भवेयुः तथा यानि नोत्पन्नानि तानि सर्वथा नोत्पद्येरन् । अयं सर्वथोत्पत्यभावः तदैव सम्भाव्यते यदा तदुत्पादका धर्मा अधर्माश्च सर्वथा नष्टाः स्युः । किन्तु अस्तित्वदशायमां धर्मोऽप्युत्पादयत्येव तथैवाधर्मोऽपि । अतोऽनेन प्रपञ्चेन सह सम्बन्धो बन्धनम्, अस्माच्च सम्बन्धात् विच्छेदो मोक्षः ।

विवेचनेनानेनेदं प्रमाणितं भवति यत् मीमांसकानां मतेन मोक्षे धर्माधर्मयोः सम्बन्धो न भवति । कतिचनात्र शङ्कन्ते यत् मुक्तावस्थायां भवतां मतेन सर्वेषु धर्मेषु नष्टेषु मुक्तः किमपि सुखमनुभवितुं न शक्नुयात्, एवं मुक्तावस्थायां सुखं न स्यात् तर्हि मोक्षः कथमिवाभीप्सितो भवेत् ? न च स पुरुषार्थ एव स्यात्, इति चेन्न, मुक्तावस्थायामपि स्वाभाविकानन्दसत्तास्वीकारात् ।

मुक्तावस्थायां मुक्तः स्वाभाविकमानन्दमनुभवति । स चानन्दो लौकिकानन्दादत्यन्तमुन्नतः । अत एव स आत्मानन्द इत्युच्यते । श्रुतिरप्यत्र प्रमाणम् **आनन्दं ब्रह्म**[9] इति । एवं मुक्तावस्थायां स्वात्मानन्दमनुभवन्नात्मा भवति । अनेन मोक्षेऽपि पुरुषार्थता उपपद्यते ।

सा च मुक्तिः किं स्वरूपा इति विचिकित्सायां नैजसुखानुभूतिरेव मुक्तिरिति वदन्ति मीमांसकाः । परं तस्यां अवस्थायां **अमनो वाक्10** इत्यादिश्रुत्या साधनाभावात् आत्मा न कमपि आनन्दमनुभवति । तथाऽपि सा पुरुषस्य चरमोऽर्थः, सर्वविध दुःखक्षयत्वात् । इदं नास्ति न्यूनं फलम् । अतः सुखदुःखादिसमग्रात्मगुणानामुच्छेद एव मोक्षः । प्रतिपादितमेतत् श्लोकवार्तिके कुमारिलभट्टपादैः –

**सुखदुःखोपभोगो हि संसार इति शब्द्यते ।**
**तयोरनुपभोगस्तु मोक्षं मोक्षविदो विदुः ।।**

एवं सुखदुःखोच्छेदे धर्माधर्मोच्छेद एव कारणरूपेण कल्पनीयः स्यादस्माभिः । धर्मे सति सुखेनावश्यं भाव्यम्, अधर्मे च सति दुःखेनावश्यं भाव्यम् । एतयोः कस्यचिदपि सत्ता यावत् स्थास्यति तावन्मुक्तिः कुतः ? शरीरस्य प्रवृत्तिस्तु कर्मण उत्पन्नं फलं भोक्तुमेव भवति । तदुक्तञ्च –

**कर्मजन्योपभोगार्थं शरीरं नः प्रवर्तते । तदभावे न कश्चिद्धि हेतुस्तदवतिष्ठते ।।**

कस्मिंश्चिदप्यशुभे कर्मणि अस्माकमसति कथमिव अस्माभिः शरीरं धार्यं स्यात् ? अर्थान्न । अत एव मीमांसाशास्त्रेण विहितं मोक्षं योऽभिलषति, स काम्यं निषिद्धञ्च कर्म न कुर्यात् । तदुक्तञ्च –

**मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।**
**नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ।**[11]

यतस्तेन काम्ये कर्मणि कृते सुखादेः प्राप्तिः स्यात्, निषिद्धे च कृते कर्मणि दुःखस्य प्राप्तिः स्यात् । एवं सुखदुःखाभ्यां मुक्तः सन् तस्यामवस्थायां स्वस्थस्तिष्ठति । तादृशस्य चरमसाध्यभूतस्य मोक्षस्य प्राप्तये प्रत्येकं जन्तुना स्वभावतो लालायितेन भाव्यमेव । किन्तु तत्प्राप्तेरधिकारित्वं नास्ति साधारणम्, एतदर्थं पूर्णयोग्यता अपेक्षिता । अस्ति शास्त्रकाराणां वक्तव्यमत्र –

**संसारादुद्विजन्ते ये दृष्टलोकपरावराः ।**
**त एव खलु मुच्यन्ते न तु यः प्राकृतो जनः ।।**

एवं विचारशास्त्रिणामभिप्रेतम् अस्य साधनानां किञ्चिन्निरूपणं मया कृतम् । **आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्य**[12] इति मोक्षसादनरूपेणास्यात्मज्ञानस्य स्वीकृतेः परम्पराऽद्वैतवादिभिः प्रवर्तिता । सा च प्रायः सर्वसम्मता संवृत्ता । मीमांसादर्शनमपि उपनिषद्वाक्यानि द्विधा स्वीकरोति - यावत् क्रतुना साक्षात् परम्परया वा तेषां सम्बन्धो भवति तावत् मीमांसादर्शनं तानि तत्रैव सङ्गमयति, यानि तत्र सङ्गतानि न भवन्ति, तानि न दृष्टमूलकानीति वदति । तदीयमिदमदृष्टं द्विविधम् – एकमभ्युदयरूपम् अन्यच्च निःश्रेयसरूपम् । अतोऽनया योजनयाऽन्यया परम्परया सहास्मिन् पक्षे तस्यापि समन्वयो भवति । **न च पुनरावर्तत**[13] इत्यादिवाक्यानां प्रमाणत्वस्वीकार एवास्य साक्षी । अत आत्माज्ञानं मोक्षेऽपि सहायकम् ।

वेदान्तविदां मते ब्रह्म परमान्नम्, जीवोऽपि मुक्तावस्थायां तस्मिन् परमान्ने निपतति, तत्र स आनन्दमनुभवति। विशिष्टाद्वैतिन एतस्मात् विभिन्नं मतमुपस्थापयन्ति। तेषां मतेन परमान्नतालाभे स आनन्दो जायते, यश्च तद्ब्रक्षणे जायते । अत एव ते रामकृष्णादिना ब्रह्मणा कृतसन्निधाना अस्यामवस्थायां अक्षय्यमानन्दमनुभवन्ति । अस्यां स्थितौ मीमांसकः सुखदुःखादिभिर्निर्लिप्तस्सन् स्वस्थस्तिष्ठति, इयमेव वास्तविकी मुक्तिः। आनन्दानन्द एव किमिव न स्यात्, एकया दृष्ट्या तदपि बन्धनमेव। यस्मान्मुक्तिः परमावश्यकी।

**सन्दर्भग्रन्थाः –**


(1) न्यायसूत्राणि-1-9
(2) वैशेषिकसूत्राणि-5-2-18
(3) न्यायदर्शनम्-5-2-18
(4) न्यायसूत्राणि-1-1
(5) छान्दोग्योपनिषत्-8-12-1
(6) छान्दोग्योपनिषत्-8-12-1
(7) छान्दोग्योपनिषत्-8-1-5
(8) बृहदारण्यकोपनिषत्-2-4-14
(9) बृहदारण्यकोपनिषत्-3-9-34
(10) तैत्तिरीयोपनिषत्-भृगुवल्ली-6
(11) मीमांसादर्शने तैत्तिरीयोपनिषद्भाष्यवार्तिकम्-9
(12) बृहदारण्यकोपनिषत्-2-4-5
(13) छान्दोग्योपनिषत्-8-15-1